नं० ~~१४८~~

२६२

[illegible]

5750/8

पू

१४१०क

त्रै. ॐ श्रीगुरुभ्यो नमः श्रीमत्त्रिपुरसुन्दर्यै नमः अथ त्रै
क. लोक्यमोहनं नामकवचं ईश्वर उवाच शृणु देवि प्र
१ वक्ष्यामि सुन्दरि प्राणवल्लभे त्रैलोक्यमोहनं नामम
हाविद्यौघविग्रहं यं धृत्वा दानवान् विस्मृतनिजचा
नमुकुन्दर्मुकुन्दः सृष्टिं वितनुते ब्रह्मा यं धृत्वा पठनाद्य
तः संहर्ताहं यतो देवि देवेशो वा सर्वो यतः धना
धिपः कुबेरोपि यतः सर्वनिधीश्वरः न देयं पराशि

छोभ्योदेयं शिछोभ्यप्रवहि अभक्तेभ्योपिपुत्रेभ्योद
त्वामृत्युमवाप्नुयात् श्रीमत्त्रिपुरसुंदर्याः कवचस्य
ऋषिः शिवः छंदो विराट् देवता च देवि त्रिपुरसुंद
री धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॐ
अस्य श्रीमहात्रिपुरसुंदरि त्रैलोक्यमोहनकवच
स्य सदाशिवऋषिः विराट्छंदः त्रिपुरसुंदरी दे
वता धर्मार्थकाममोक्षार्थे जपे पाठे विनियोगः

त्रै॰
क॰
२

शिरोमेवाग्भवंपातु पञ्चलह्रीं स्वरूपकं हसकलह्रीं
ललाटंचपातु कामेश्वरादितः हसकलह्रींचदक्षो
पातुमेकाममध्यमः कहलह्रींश्रुतीपातु महासौ
भाग्यदायकः हकलसह्रींशक्तिबीजंपातुजिह्वां
चपंचमी वदनंसकलंपातु पंचकूटैस्तु सर्वदा
कएईलह्रींघ्राणंमांपातु कामेश्वरीमम हसकल
ह्रींकंठंपातुपातुस्वभावनीमम सकलह्रींशक्ति

बीजंस्कंधोपातुपरात्मिका कामेनोपासितादेवी
कंठदेशंसदावतु कामादिषोडशीपातुभुजौत्रिपु
रसुंदरी तारादिषोडशीपातुकरौरंवादिषोडशी
मायादिकंस्पदंपातुस्तनौवागादिषोडशी पार्श्वौ
वरादिकापातुचंटांश्रीसुंदरीमम हसकलह्रीं
पातुपृष्टंहसहलह्रींसदा कुक्षिंपातुकामराजः
सकलह्रींसदावतु देवीपंचदशीदेवीमध्यदे

त्रै॰ शंचरक्षतु कहएईलह्रींनाभिंपातुहकएईलह्रीं कटिं
क॰ पातुसक्थिनीचसकएईलह्रींसदा पातुसामनुनारा
३ पात्सुंदरीमांसदावतु ऐंसकएईलह्रींतदूरूयुग्मस
दावतु सहकएईलह्रींगुह्यंपायाद्धसकएईलह्रीं
3
जानुनीसुंदरीपातुचंद्रेणाराधिताचमां हसकएई
लह्रींतज्जंघायुग्मंसदावतु हसकएईलह्रींगुल्फयु
ग्मंसदावतु सहकएईलह्रींपादंपायात्त्रिपुरसुंदरी

कुवेराराधिता सम्यक् सर्वांगे मां सदावतु कएईल
ह्रीं तु प्राच्यां वै सदा मां परिरक्षतु हसकहलह्रीं का
मो मामग्निदिशि रक्षतु सहसकह्रीं याम्ये तु पातु
सा सुंदरी परा अगस्त्योपासिता विद्या चक्रस्या मां स
दावतु सएईलह्रीं च नित्या नैरृत्यां मां सदावतु स
हकहलह्रीं पातु प्रतीच्यां त्रिपुरा सदा सकलह्रीं
सौं पातु मां त्रिपुरा देवी नंदिकेन प्रपूजिता कएईल

त्रै· क· ४

ह्रीं वायव्यांहसकहलह्रींनयोत्तरे सकलह्रींऐशा
न्यांसुंदरीमांसदावतु इंद्रेणपूजितासामांश्रीमत्त्रि
पुरसुंदरी हसकलह्रींसहकलह्रींसूर्यपूज्यासुं
दरीमेसर्वांगंपरिरक्षतु हसकह्रींहसकलह्रींस
कलह्रींपायाद्ब्राह्मणीमांश्रीमत्त्रिपुरसुंदरी हस
कहलह्रींपातालेचतुःकूटा शांकरीयासदामांप
रिरक्षतु हसकलह्रींरहंसकहलह्रींशिवः सक

5

लह्रींपातुनाभिंसपईलह्रीं अनाहतं सहकहल
ह्रींकंठंसकलह्रींमनोभुवः त्रिकूटावैसवीसातुपा
तुमांसुंदरीपरा कपईलह्री हसकहलह्रीस
कलह्री ह्वींसमाप्रपूज्याचपायादितुसुंदरी
कहपईलह्रीं हकईलह्रींसकपह्रींईलह्रींक्रोयेन
पूजितादेवीविदितुमांसदावतु हसकलह्रींहस
कसलह्रींसकलह्रीं महाज्ञानमयीपातुमांसहा

त्रै॰ षोडशीपरा श्रीमायामदनोवाणीपरान्तारंश्रिवाश्रि
क॰ या ह्रिश्रियात्रिकूटामापरावाणीमनोभवः माया
५ लक्ष्मीर्महाविद्यामावीजाषोडशीपरा सर्वांगमे
सदापातुश्रीमत्त्रिपुरसुंदरी कामोमायापराबाला
5 त्रिकूटास्त्रीभगांकुशौ कालिकाकमलाकूर्चः सर्वा
दौप्रणवःश्रिये श्रीमहाषोडशीपातुव्याव्यातासु
वनत्रये ज्ञानेनमस्तुह्नासास्यात्तत्पीरस्यासर्वदा

वक्त्र श्रीमहाषोडशी पूर्णा श्रियादेव्याप्रपूजिता
यस्य विज्ञानमात्रेण मन्त्रंमन्त्रीर्भवेत्स्वयं अष्टाद
शाक्षरीब्रह्मसापिमामभितोवक्त्र इतितेकथितं
दिव्यंब्रह्मविद्याविशारदं त्रैलोक्यमोहनंनाम
कवचंब्रह्मनिर्मितं ससहस्रमहाविद्यातंत्रादौ
कथिताप्रिये तासांसारात्सारतरायथाविद्यासु
गोपिताः बहुनाकिमिहोक्तेन श्रीमहाषोडशी

त्रै· परा प्रकाशितामहादेवियाएष्यान्तेपुनःपुनः महा
क· विद्यामयंब्रह्मकवचंमन्मुखोदितं गुरुमभ्यर्च्यावि
८ धिवत्कवचंप्रपठेन्नरः त्रिसकृद्वायथाज्ञानंसोपि
पुण्यवतांवरः देशिकसर्वविद्यासुचाधिकारीज
पादिषु देवीमभ्यर्च्यविधिवत्पुरश्चर्यांसमाच
रेत् अष्टोत्तरशतंजप्त्वादशांशंहवनादिकं तत
स्तात्सिद्धकवचःपुण्यात्मामदनोपमः मंत्रसिद्धि

र्भवेत्तस्य पुरश्चर्याः विनाततः गद्यपद्यमयी
वाणी तस्य वक्त्रात्प्रजायते वक्त्रे तस्य भवेद्धा
णी कमला निश्चला गृहे पुष्पाञ्जल्यष्टकं देव्यै मू
लं चैव पठेत्सकृत् अपि वर्षसहस्राणां पूजा
याः फलमाप्नुयात् आत्मानं तन्मयं कृत्वा यः पठे
त्कवचं परं यो यः पश्यति तं शीघ्रं स स सदा सो भ
वेद्ध्रुवं विलिख्य भूर्जे गुटिका स्वर्णस्थां धारयेद्य

त्रै॰ क॰ ७

दि कंठेवा दक्षिणेबाहौ समकुर्याद्दासर्वजगतत्रिलो
कीक्षोभयेत्पेव त्रैलोक्यविजयीभवेत् तज्ञात्रंप्रा
प्यशास्त्राणि ब्रह्मास्त्रादीनिपार्वति माल्यानिकुसु
मान्येवसुखदानिभवंतिहि स्पर्धामद्भूयभवने
लक्ष्मीर्वाणीवसेज्जनः इदंकवचमज्ञात्वायोजपे
त्सुंदरींपरां नवलक्षप्रजप्तापित्स्यविद्यानसि
द्ध्यति सप्रास्त्रघातमाप्नोतिसत्वरंजमामुया

न् इति श्रीरुद्रयामले तंत्रे देवी ईश्वर संवादे त्रैलो
क्यमोहनंनामकवचं समाप्तम् ॥